उस समय भी योग की साधना करने वाले चार ही पुत्र महान् आत्मा वाले उत्पन्न होंगे जिनके नाम अधोलिखित हैं ।२१। सनक और सनातन के अतिरिक्त परम सामर्थ्य वाले सनन्दन तथा अहंकार से रहित, विभु और निर्मल हृदय वाले चौथे सनत्कुमार नामक होंगे ।२२। हे विधाता उस युग में मेरा नाम कङ्कु होगा और मैं तब निवृत्ति के उत्तम मार्ग की वृद्धि करते हुए व्यास जी का सहायक बनूँगा ।२३। इसके पश्चात् जिस समय छठवाँ द्वापर युग का समय उपस्थित होगा तब मृत्यु नामक व्यास के रूप में जन्म ग्रहण करेंगे जिन्होंने लोकी रचना तथा वेदों का यथाक्रम विभाजन किया है ।२४। उस वक्त भी मेरा आविर्भाव लोकाक्षि के नाम से होगा और व्यास की सहायता करते हुए निवृत्ति के मार्ग को ही बढ़ाने वाला रहूँगा ।२५। उस वक्त भी सुधामा, संजय, विरजा और विजय नाम वाले मेरे चार शिष्य बहुत ही दृढ़ व्रत के धारण करने वाले होंगे ।२६। हे विधिदेव ! जब सप्तम द्वापर युग आयेगा तब इन्द्र व्यास होंगे और मैं सर्वज्ञाता जैगीषव्य होकर प्रकट होऊँगा ।२७। उस समय मैं महान् योग में अत्यन्त निपुण होकर योग को सुदृढ़ बनाऊँगा और काशी में एक गुफा के अन्दर परम उत्तम स्थान की रचना कर कुशासन पर संस्थित रहूँगा ।२८।

साहाय्यं च करिष्यामि व्यासस्य हि शतक्रतोः ।
उद्धरिष्यामि भक्तांश्च संसारभयतो विधे ।२९
तत्रापि मम चत्वारो भविष्यन्ति सुता युगे ।
सारस्वतश्च योगीशो मेघवाहः सुवाहनः ।३०
अष्टमे परिवर्त्ते हि वसिष्ठो मुनिसत्तमः ।
कर्त्ता वेदविभागस्य वेदव्यासो भविष्यति ।३१
तत्राप्यहं भविष्यामि नामतो दधिवाहनः ।

व्यासस्य हि करिष्यामि साहाय्यं योगवित्तम ।३२।
कपिलश्चासुरिः पञ्चशिखः शाल्वलपूर्वकः ।
चत्वारो योगिनः पुत्रा भविष्यन्ति समा मम ।३३।
नवमे परिवर्ते तु तस्मिन्नेव युगे विधे ।
भविष्यति मुनिश्रेष्ठो व्यासः सारस्वताह्वयः ।३४।
व्यासस्य ध्यायतस्तस्य निवृत्तिपथवृद्धये ।
तदाऽहं भविष्यामि ऋषभो नामतः स्मृतः ।३५।

व्यास स्वरूप में जो उस वक्त शतक्रतु होंगे उनकी सहायता करते हुए भक्तों का उद्धार करूँगा ।२९। उस समय भी मेरे सारस्वत-योगीश-मेघवाहन और सुवाहन नाम वाले चार पुत्र उत्पन्न होंगे ।३०। जब इसी क्रम से अष्टम द्वापर आयेगा तब वसिष्ठ मुनि व्यास होंगे और ये ही मुनि श्रेष्ठ उस वक्त वेदों के विभाग करने वाले बनेंगे ।३१। हे योग ज्ञान रखने वालों में परम श्रेष्ठ ! उस समय मेरा नाम दधिवाहन होगा और व्यास का सहायक रहूँगा ।३२। उस वक्त भी परम योगी कपिल-आसुरि-पञ्च-शिख और शाल्वल नाम वाले चार पुत्र होंगे जो सभी समान रूप से योग्यता रखने वाले होंगे ।३३। हे ब्रह्मा ! नवम द्वापर युग में मुनियों में अति श्रेष्ठ सारस्वत नामधारी व्यास होंगे ।३४। उस वक्त में होने वाले व्यास का ध्यान रखकर निवृत्ति मार्ग की वृद्धि के लिये ही मैं ऋषभ नाम से आविर्भूत होऊँगा ।३५।

पराशरश्च गर्गश्च भार्गवो गिरिशस्तथा ।
चत्वारस्तत्र शिष्या मे भविष्यन्ति सुयोगिनः ।३६।
तैः साकं दृढयिष्यामि योगमार्गं प्रजापते ।
करिष्यामि साहाय्यं वै वेदव्यासस्य सन्मुने ।३७।
तेन रूपेण भक्तानां बहूनां दुःखिनां विधे ।
उद्धारं भवतोऽहं वै करिष्यामि दयाकरः ।३८।
सोऽवतारो विधे मे हि ऋषभाख्यः सुयोगकृत् ।
सारस्वतव्यासमनः पूर्त्तौ नानौतिकारकः ।३९।

अवतारेण मे येन भद्रायुर्नृपबालकः ।
जीवितो हि मृतः क्ष्वेडदोषतो जनकोज्झितः ।४०।
प्राप्तेऽथ षोडशे वर्षे तस्य राजशिशोः पुनः ।
ययौ तद्वेश्म सहसा ऋषभः स मदात्मकः ।४१।
पूजितस्तेन स मुनिः सद्रूपश्च कृपानिधिः ।
उपादिदेश तद्धर्मान्राज्ययोगान्प्रजापते ।४२।

उस समय मेरे पराशर-गर्ग-भार्गव और गिरीश नाम वाले चार परम श्रेष्ठ योगी शिष्य रूप में प्रकट होंगे ।३६। हे प्रजापते ! इनको साथ में लेकर मैं संसार योग के मार्ग को अति सुदृढ़ बनाते हुए व्यास का सहायक बनूँगा ।३७। मैं उस वक्त अत्यन्त दुःखित भक्तजनों का और तुम्हारा भी उद्धार करूँगा ।३८। मेरा यह अवतार ऋषभ के नाम वाला सुयोग करने के लिये सारस्वत व्यास मुनि का सहायक और बहुविध कल्याण का करने वाला होगा ।३९। उस समय मैंने अवतार लेकर भद्रायु नाम वाले एक नृप के बालक को जो छींक के दोष के कारण मृत्युगत हो गया था और पिता ने त्याग दिया था उसे पुनः जीवित कर दिया था ।४०। जब वह बालक सोलह वर्ष का हो गया उस समय उस राजा के घर में मेरी आत्मा ऋषभ के स्वरूप में हो गई थी ।४१। हे प्रजापते ! उस वक्त परम शोभित स्वरूप वाले कृपा के निधि उन मुनि का बहुत बड़ा आदर-सत्कार किया गया था । मुनिवर ने राजा को राजयोग से युक्त धर्म का उपदेश दिया था ।४२।

ततः स कवचं दिव्यं शंखं खड्गं च भास्वरम् ।
ददौ तस्मै प्रसन्नात्मा सर्वशत्रुविनाशम् ।४३।
तदङ्गभस्मनामृश्य कृपया दीनवत्सलः ।
स द्वादशसहस्रस्य गजानां च बलं ददौ ।४४।
इति भद्रायुषं सम्यगनुश्वास्य समातृकम् ।
ययौ स्वैरगस्ताभ्यां पूजितो ऋषभः प्रभुः ।४५।
भद्रायुरपि राजर्षिर्जित्वा रिपुगणान्विधे ।
राज्यं चकार धर्मेण विवाह्य कीर्त्तिमालिनीम् ।४६।

इत्थंप्रभाव ऋषभोवतारः शंकरस्य मे ।
सतां गतिर्दीनबन्धुर्नवमः कथितस्तव ।४७
ऋषभस्य चरित्रं हि परमं पावनं महत् ।
स्वर्ग्यं यणस्यमायुष्यं श्रोतव्यं च प्रयत्नतः ।४८

ऋषभ देव ने परम प्रसन्न होकर राजा को एक दिव्य कवच-शङ्ख और समस्त शत्रु समुदाय का नाश करने वाला एक खड्ग प्रदान किया था ।४३। दीनजन पर दया की वृष्टि करने वाले ऋषभ मुनिराज ने उस राजा के समस्त अंगों में भस्म लगाकर उसे बारह हजार हाथियों के समान बल प्रदान किया ।४४। उस समय माता के साथ भद्रायु को भलीभाँति समझा कर धीरज दिया और फिर माता एवं पुत्र द्वारा वंदित होकर ऋषभ मुनि अपने अभीष्ट स्थान को चले गये थे ।४५। हे विधे ! इसके अनन्तर राजर्षि भद्रायु समस्त शत्रुओं पर विजय पाकर कीर्त्ति-मालिनी नाम वाली एक सुन्दर कन्या के साथ विवाह कर धर्म के साथ राज-काज करने में तत्पर हो गये ।४६। मेरे इस नवम ऋषभ अवतार का ऐसा प्रभाव होता है जो सदा सत्पुरुषों का उद्धारक—दीनों का वन्धु-रूप हुआ है । मैंने तुमको इसे सुना दिया है । यह ऋषभ चरित्र मानवों को पवित्र बना देने वाला, स्वर्ग सुख प्रदाता और यश तथा आयु की वृद्धि करने वाला है । इसे सब को यत्न के साथ अवश्य ही श्रवण करना चाहिए ।४७–४८।

## ग्यारह रुद्रावतारों का वर्णन

एकादशावतारान्वै शृण्वथो शङ्करान्वरान् ।
यान्छ्रुत्वा न हि बाध्येत बाधाऽसत्यादिसम्भवा ।१
पुरा सर्वे सुराः शक्रमुखा दैत्यपराजिताः ।
त्यक्त्वामरावतीम्भीत्याऽपलायन्त निजाम्पुरीम् ।२
दैत्यप्रपीडिता देवा जग्मुस्तं कश्यपान्तिकम् ।
बद्ध्वा करान्नतस्कंन्धाः प्रणेमुस्तं सुविह्वलम् ।३
सुनुत्वा तं सुराः सर्वे कृत्वाविज्ञप्तिमादरात् ।
सर्वं किवेदयामासुः स्वदुःखं तत्पराजयम् ।४

ततः स कश्यपस्तात तत्पिता शिवशक्तधीः ।
तदाकर्ण्यामराकं वै दुःखिमोऽभूत्तदाऽधिकम् ।५
तानाश्वास्य मुनिः सोऽथ धैर्यमाधाय शान्तधीः ।
काशीं जगाम सुप्रीत्या विश्वेश्वरपुरीम्मुने ।६
गङ्गांभसि ततः स्नात्वा कृत्वा तं विधिमादरात् ।
विश्वेश्वरं समानर्च साम्बं सर्वेश्वरं प्रभुम् ।७

नन्दीश्वर ने कहा—अब भगवान् शिव के ग्यारह परम श्रेष्ठ अवतारों की कथा सुनो जिससे असत्य आदि के दोषों से उत्पन्न होने वाली बाधा मनुष्यों को कभी भी पीड़ित नहीं किया करती हैं ।१। पूर्व समय में इन्द्रादि देवगण दैत्यों से पराजित होकर सब भयभीत होते हुए अपनी अमरावती को छोड़कर इधर-उधर भाग गये ।२। असुरों से उत्पीड़ित होकर समस्त देवता कश्यप ऋषि के पास पहुँचे और भयाकुल होकर दोनों हाथ जोड़कर कन्धा झुकाते हुए उन्हें प्रणाम किया ।३। इसके अनन्तर अपने दैत्यों से होने वाले पराजय के दुःख के विषय में ऋषि से आदरपूर्वक प्रार्थना की ।४। हे तात ! देवगण के पिता भगवान् शिव में आसक्त होने के कारण उनकी उस प्रार्थना को सुनकर विशेष दुःखित हुए ।५। हे मुने ! तब परम शान्त बुद्धि वाले कश्यप ऋषि ने देवताओं को आश्वासन देते हुए धैर्य बधाया और प्रसन्नता के साथ विश्वनाथ की पुरी काशी को चले गये ।६। वाराणसी में गंगा स्नान कर विधिपूर्वक अपना नित्य नैमित्तिक कर्म सादर समाप्त कर उमा के सहित जगदीश्वर विश्वनाथ का अर्चन किया ।७।

शिवलिंगं सुसंस्थाप्त चकार विपुलं तपः ।
शम्भुमुद्दिश्य सुप्रीत्या देवानां हितकाम्यया ।८
महान्कालो व्यतीताय तपस्तस्य वै मुने ।
शिवपादाम्बुजासक्तमनसो धैर्य्यशालिनः ।९
अथ प्रादुरभूच्छम्भुर्वर दातुं तदर्षये ।
स्वपदासक्तमनसे दीनबन्धुः सतां गतिः ।१०
वरं ब्रूहीति चोवाच सुप्रसन्नोमहेश्वरः ।

कश्यपं मुनिशार्दूलं स्वभक्त भक्तवत्सलः ।११।
दृष्ट्वाऽथ त महेशानं स प्रणम्य कृताञ्जलिः ।
तुष्टाव कश्यपो हृष्टो देवतातः प्रसन्नधीः ।१२।
देवदेव महेशान शरणागतवत्सल ।
सर्वेशः परमात्मा त्वं ध्यानगम्योऽद्वयोऽव्ययः ।१३।
बलनिग्रहकर्त्ता त्व महेश्वरं सतां गतिः ।
दीनबन्धुर्दयासिन्धुर्भक्तरक्षणदक्षधीः ।१४।

काशीपुरी में कश्यप ऋषि ने शिव के लिंग की स्थापना करके देवगण की भलाई करने की इच्छा से शिव को प्रसन्न करने के लिये प्रेम भाव के साथ अत्यन्त कठिन तपस्या की ।८। हे मुनिवर ! इस तरह विश्वनाथ के चरणों में धीरज के साथ मन लगाकर तपश्चर्या करते हुए कश्यप मुनि का बहुत सा समय व्यतीत हो गया ।९। इसके पश्चात् ऐसे मनोयोग से कठिन तपस्या करने वाले ऋषि को परम सन्तुष्ट होकर प्रसन्नता से वरदान देने के लिये सत्पुरुषों का उद्धार करने वाले दीनबन्धु शिव प्रकट हो गये ।१०। उस समय शिव ने भक्तवत्सलता के कारण द्रवीभूत होकर परम भक्त कश्यप ऋषि से कहा—लो, मेरा यह वरदान ग्रहण करो ।११। भगवान् महेश्वर का साक्षात् दर्शन कर कश्यप ऋषि अत्यन्त हर्षित हुए और उत्तम बुद्धि वाले कश्यप ने साञ्जलि उनको प्रणाम कर स्तुति करना आरम्भ किया ।१२। कश्यप ऋषि ने निवेदन किया—हे देवदेव ! हे शरणागत वत्सल ! आप सब के स्वामी, परमेश और ध्यान-योग से प्राप्त करने के योग्य हैं। आप सर्वदा अविनाशी एवं अद्वैत रूप हैं ।१३। हे महेश्वर ! आप बल के अवरोधक, सज्जनों को सद्गति देने वाले, दीन-हीनों के बन्धु, दया के अगाध सागर और अपने भक्तजनों की रक्षा करने में कुशल हैं ।१४।

एते सुरास्त्वदीया हि त्वद्भक्ताश्च विशेषतः ।
दैत्यैः पराजिताश्चाद्य पाहि तान्दुःखितान् प्रभो ।१५।
असमर्थो रमेशोऽपि दुःखदस्ते मुहुर्मुहुः ।
अतः सुरामच्छरणा देवयन्तोऽसुख च तत् ।१६।

तदर्थं देवदेवेश देवदुःखविनाशक ।
त्वत्पूरितां तपोनिष्ठां प्रसन्नार्थं तवासदम् ।१७।
शरणं ते प्रपन्नोऽस्मि सर्वथाऽहं महेश्वर ।
कामं मे पूरय स्वामिन्देवदुःखं विनाशय ।१८।
पुत्रदुःखैश्च देवेशः दु खितोऽह विशेषतः ।
सुखिनं कुरु मामीश सहायस्त्वं दिवौकसाम् ।१९।
भूत्वा मम सुता नाश देवायक्षाः पराजिताः ।
दैत्यैर्महाबलैः शम्भो सुरानन्दप्रदो भव ।२०।
सदैवास्तु महेशान सर्वलेखसहायकृत् ।
यथा दैत्यकृता बाधा न वाधेत सुरान्प्रभो ।२१।

हे प्रभो ! ये समस्त देवगण आपके हैं और विशेष रूप से ये आपकी भक्ति करने वाले हैं। इस समय ये बिचारे असुरों से पराजित होकर महादुःखित हो रहे हैं। आप कृपा कर इनकी रक्षा कीजिए ।१५। भगवान् विष्णु भी स्वयं असमर्थ होकर आपको ही आकर कष्ट देते हैं। अतएव देवगण दुःखित होते हुए बार-बार मेरी शरण में आते हैं और अपने उत्पीड़न की बात कहा करते हैं ।१६। हे देवेश्वर ! देवों के दुःख विनाशक ! अपने इसी मनोरथ की पूर्णता के लिये आपको प्रसन्न करने को मैंने इस घोर तपस्या करने का अनुष्ठान किया है ।१७। हे स्वामिन् ! हे महामहेश्वर ! मैं सब प्रकार से अब आपकी शरण में आ गया हूँ। आप कृपा कर मेरी कामना सफल करते हुए देवगण की पीड़ा का निवारण करें ।१८। हे ईश ! मैं अपने आत्मजों के दुःख से विशेष दुःखित हो रहा हूँ। आप स्वयं सर्वदा देवों के सहायक रहे है अब इनका दुःख दूर कर मुझे सुख प्रदान करें ।१९। हे शम्भो ! हे नाथ ! देवगण मेरे पुत्र होते हुए इन दुष्ट दैत्यों से पराजित हुए हैं। आप सदा यक्ष और देवों को आनन्द देने वाले हैं ।२०। हे महेशान ! आप समस्त देवगण की सहायता करने वाले हैं। अतः अब ऐसा अपना अनुग्रह करें जिससे दैत्यों द्वारा देवताओं को कोई पीड़ा की बाधा उपस्थित न हो ।२१।

इत्युक्तस्य तु सर्वशस्तथेति प्रोच्य शंकरः ।

पश्यतस्तस्य भगवांस्तत्रैवान्तर्दधे हरः ।२२
कश्यपोऽपि महाहृष्टः स्वस्थानमगमद्द्रुतम् ।
देवेभ्यः कथयामास सर्ववृत्तान्तमादरात् ।२३
ततः स शङ्करः सर्वं सत्यं कर्तुं स्वकं वचः ।
सुरभ्यां कश्यपाज्जज्ञे एकादशस्वरूपवान् ।२४
महोत्सवस्तदाऽऽसीद्वै सर्वं शिवमवं त्वभूत् ।
आसन्हृष्टाः सुराश्चाथ मुनिना काश्यपेन च ।२५
कपाली १ पिंगलो २ भीमो ३ विरूपाक्षो ४ विलोहितः ५।
शास्ताऽ६ जपाद ७ हिर्बुध्न्यः शंभु ९ श्चण्डो १० भवस्तथा११।२६
एकादशैते रुद्रास्तु सुरभोतनयाः स्मृताः ।
देवकार्यार्थमुत्पन्नाः शिवरूपाः सुखास्पदाः ।२७
ते रुद्राः काश्यपा वीरा महाबलपराक्रमाः ।
दैत्याञ्जघ्नुश्च संग्रामे देवसाहाय्यकारिणः ।२८

नन्दीश्वर ने कहा—जब कश्यक ऋषि ने ऐसी दीन प्रार्थना की तो 'ऐसा ही होगा' इतना कहकर उनके देखते हुए ही भगवान् शङ्कर वहाँ ही अन्तर्हित हो गये ।२२। इसके अनन्तर कश्यप मुनि अत्यन्त प्रसन्नता के साथ शीघ्र अपने स्थान पर लौट आये और यह समस्त वृतान्त प्रेम-पूर्वक देवगण को सुना दिया ।२३। इसके पश्चात् भगवान् शिव अपना वचन सत्य करने के लिये एकादश स्वरूप धारण कर कश्यप ऋषि से सुरभि में प्रकट हुए ।२४। उस समय विश्व में सर्वत्र आनन्दोल्लास छा गया । ऐसा द्रतीत होता था मानो यह जगत् सब शिव स्वरूप ही हो गया है । समस्त देवगण कश्यप जी से बहुत अधिक प्रसन्न हुए और उत्सव मनाने लगे ।२५। सुरभि के एकादश पुत्रों के नाम कपाली-पिंगल-भीम-विरूपाक्ष-विलोहित-शास्ता-अहिर्बुध्न्य-शम्भु-चण्ड और भव हुए थे ।२६। ये एकादश रुद्र सुरभि के पुत्र रूप में उत्पन्न हुए हैं और इन सबका उद्-भव केवल देवगण के कार्य सम्पादन करने ही के लिये हुआ था । ये सब सुख के आलय साक्षात् शिव के स्वरूप हैं ।२७। ये महान् बली एवं परम

पराक्रमी वीर थे । कश्यप के पुत्र रूप में उत्पन्न होकर सुरों की सहायता इन ग्यारह रुद्रों का प्रादुर्भाव हुआ । इन्होंने युद्धमें दैत्यों का संहार किया ।२८

तद्रुद्रकृपया देवा दैत्यांश्चित्वा च निर्भयाः ।
चक्रुः स्वराज्यं सर्वे ते शक्राद्याः स्वस्थमानसाः ।२९
अद्यापि ते महारुद्राः सर्वे शिवस्वरूपकाः ।
देवानां रक्षणार्थाय विराजन्ते सदा दिवि ।३०
ऐशान्याम्पुरि ते वासं चक्रिरे भक्तवत्सलाः ।
विरमन्ते सदा तत्र नानालीलाविशारदाः ।३१
तेषामनुचरा रुद्राः कोटिशः परिकीर्तिताः ।
सर्वत्र संस्थितास्तत्र त्रिलोकेष्वभिभागशः ।३२
इति ते वर्णितास्तातावतारा: शङ्करस्य वै ।
एकादशमिता रुद्राः सर्वलोकसुखावहाः ।३३
इदमाख्यानममलं सर्वपापप्रणाशकम् ।
धन्यं यशस्यमायुष्यं सर्वकामप्रदायकम् ।३४
य इदं शृणुयात्तात श्रावणेद्वा समाहितः ।
इह सर्वसुखं भुक्त्वा ततो मुक्तिं लभेत सः ।३५

इसके उपरान्त एकादश रुद्रों के अनुग्रह से दैत्यों पर विजय प्राप्त कर देवगण ने निर्भय होकर इन्द्रादि के सहित सुखपूर्वक अपने राज्य के आनन्द का अनुभव किया ।२९। आज तक भी शिव के स्वरूप वाले ये महारुद्र देवगण की रक्षा करने के लिये निरन्तर देवलोक में विराजमान रहते हैं ।३०। परम भक्तवत्सल विविध लीला-कुशल ये ईशान दिशा में सदा निवास करते हुए वहाँ रमण किया करते हैं ।३१। उसके अनुगामी सेवक करोड़ों की संख्या में हैं जोकि त्रिभुवन में सब जगह चारों ओर स्थित रहा करते हैं ।३२। हे तात ! हमने तुम्हारे समक्ष से भगवान् शिव के इन एकादश अवतारों का वर्णन कर दिया। यह चरित्र सबको अत्यन्त सुख देने वाला होता है ।३३। जो कोई भी इस परम पावन चरित्र को सुनता या सुनाता हैं वह इस लोक में समस्त लौकिक सुखों का उपभोग कर अन्त समय में मोक्ष की प्राप्ति किया करता है ।३४-३५।

## दत्तात्रेय, दुर्वासा और चन्द्रमा का जन्म

अथान्यच्चरितं शम्भोः शृणु प्रीत्यामुने ।
यथाबभूव दुर्वासाः शंकरो धर्महेतवे ।१।
ब्रह्मपुत्रो बभूवात्रितपस्वी ब्रह्मवित्प्रभुः ।
अनसूयापतिर्धीमान्ब्रह्माज्ञाप्रतिपालकः ।२।
सुनिर्देशाद्ब्रह्मणो हि सस्त्रीकः पुत्रकाम्यया ।
स ऋक्षकुलनामानं ययौ च तपसे गिरिम् ।३।
प्राणानायम्य विधिवन्निविन्ध्यातटिनीतटे ।
तपश्चचार सुमहदन्दोऽब्दशतं मुनिः ।४।
य एक ईश्वरः कश्चिदविकारो महाप्रभुः ।
स मे पुत्रवरं दद्या दिति निश्चितमानसः ।५।
बहुकालो व्यतीयाय तस्मिन्स्तपति सत्तपः ।
आविर्बभूव तत्मात्तु शुचिज्ज्वाला महीयसी ।६।
तयासन्निखिला लोका दग्धप्राया मुनीश्वराः ।
तथा सुरर्षयः सर्वे पीडिता वासवादयः ।७।

नन्दीश्वर ने कहा—हे महामुने ! अब आप भगवान् शिव का वह चरित्र प्रेमपूर्वक सुनो जिसमें शिव ने धर्म के निमित्त से दुर्वासा का स्वरूप ग्रहण किया था ।१। परम तपस्वी, पूर्ण ब्रह्म के ज्ञाता, महामनीषी, विधाता के अत्यन्त आदेश-पालक और अनसूया के पति अत्रि मुनि ब्रह्मा जी के पुत्र थे ।२। अपने पिता की आज्ञा मानकर पुत्र प्राप्ति की इच्छा से अत्रि अपनी पत्नी के साथ ऋक्ष नामक गिरि पर तपश्चर्या करने के लिये चले गये ।३। विन्ध्य गिरि के निकट नदी तट पर अत्रि मुनि ने सविधि अपने प्राणों को रोक कर निश्चिन्त रूप से सौ वर्ष तक महाघोर तपस्या की ।४। उस समय अत्रि ने अपने हृदय में ऐसा ठान लिया था कि जो भी कोई अधिकारी एकमात्र परमेश्वर महाप्रभु हैं वे मुझे अवश्य ही श्रेष्ठ पुत्र प्राप्त करने का वरदान देंगे ।५। इस तरह अत्यन्त कठिन तपस्या करते हुए जब अधिक समय व्यतीत हो गया तो उनके मस्तक से बहुत ही तीक्ष्ण पवित्र अग्नि की ज्वाला प्रकट हुई ।६। उस अग्नि-

ज्वाला का ऐसा तीव्रतम तेज था कि समस्त इन्द्रादि देवगण, मुनिमण्डल, ऋषि समूह और लोक भस्म होकर पीड़ित होने लगे ॥७॥

अथ सर्वे वासवाद्या सुराश्च मुनयो मुने ।
ब्रह्मस्थान ययुः शीघ्रं तज्ज्वालातिप्रपीडिताः ॥८
नुत्वा नुत्वा विधिन्देवास्तत्स्वदुःखन्न्यवेदयन् ।
ब्रह्मा सह सुरैस्तात विष्णुलोक ययादरम् ॥९
तत्र गत्वा रमानाथं नुत्वा नुत्वा विधिः सुरैः ।
स्वदुःखं तत्समाचख्यौ विष्णवेऽनन्तकं मुने ॥१०
विष्णुश्च विधिना देवैः रुद्रस्थानं ययौ द्रुतम् ।
हरं प्रणम्य तत्रैत्यंतुष्टाव परमेश्वरम् ॥११
स्तुत्वा बहुतया विष्णुं स्वदुःखं च म्यवेदयत् ।
शर्व ज्ज्वालासमुद्भूतमत्रेश्च तपसः परम् ॥१२
अथ तत्र समेतास्तु ब्रह्माविष्णुमहेश्वरा ।
मुने संमंत्रयाञ्चक्रु रन्योन्यं जगतां हितम् ॥१३
तदा ब्रह्मादयो देवास्त्रयस्ते वरदर्षभाः ।
जग्मुस्तदाश्रमं शीघ्रं वरं दातुं तदर्षये ॥१४
स्वचिह्नचिह्नतांस्तान्स दृष्ट्वाऽत्रिर्मुनिसत्तमः ।
प्रणनाम च तुष्टाव वाग्भिरिष्टाभिरादरात् ॥१५

हे मुनिवर ! उस समत इन्द्रादि देववृन्द और मुनि आदि सभी उस अग्नि से संतप्त होकर शीघ्र ही ब्रह्माजी के निवास स्थान पर गये ॥८॥ हे तात ! वहाँ पहुंच कर सबने प्रणामपूर्वक स्तवन कर ब्रह्माजी से अपने दुःख का वृत्तान्त बताया । तब ब्रह्मा भी उन सबको साथ लेकर विष्णु-लोक को गये ॥९॥ हे मुनिराज ! वहाँ पहुंचकर सब देवों के सहित विष्णु को बार-बार प्रणाम करते हुए उनसे अपने दुःख की प्रार्थना की ॥१०॥ इसके अनन्तर इन सबको अपने साथ लेकर भगवान् विष्णु शिव के समीप गये । वहाँ महेश्वर को प्रणाम करके सभी लोग भगवान् शंकर की स्तुति करने लगे ॥११॥ अधिक समय तक स्तुति करने के पश्चात् व्यापक शिव से अत्रि के तप द्वारा उत्पन्न अग्नि के तेज से होने वाला

अपने दुःख का निवेदन किया ।१२। हे मुने ! उस समय वहाँ ब्रह्मा, विष्णु और महेश इन तीनों ने परस्पर में मिलकर समस्त लोकों के कल्याण के लिये परामर्श करना आरम्भ करदिया ॥१३॥ हे देव ! खूब सोच विचार कर ब्रह्मादि तीनों देवता अत्रि ऋषि को वरदान देने के लिए शीघ्रता से ऋषि के आश्रम में गये ॥१४। वहाँ उस समय अत्रि ने इन तीनों को अपने-अपने विशेष चिह्नों से अंकित देखकर सादर सबको परम प्रिय वाणी द्वारा प्रणाम किया और स्तुति करने लगे ॥१५॥

ततः स विस्मितो विप्रस्तानुवाच कृताञ्जलिः ।
ब्रह्मपुत्रो विनीतात्मा ब्रह्मविष्णुहराभिधान् ॥१६
हे ब्रह्मन् हे हरे रुद्र पूज्यास्त्रिजगताम्मताः ।
प्रभवश्चेश्वराः सृष्टिरक्ष संहारकारकाः ॥१७
एक एव मया ध्यात ईश्वरः पुत्रहेतवे ।
यः कश्चिदीश्वरः ख्यातो जगतां स्वस्त्रिया सह ॥१८
यूयं त्रयः सुराः कस्मादागता वरदर्षभाः ।
एतन्मे संशयं छित्त्वा ततो दत्तेप्सितं वरम् ॥१९
इति श्रुत्वा वचस्तस्य प्रत्यूचुस्ते सुरास्त्रयः ।
यादृवकृतस्ते संकल्पस्तथैवाभून्मुनीश्वर ॥२०
वयं त्रयो भवेशानाः समाना वरदर्षभाः ।
अस्मदंशभवास्तस्माद्भविष्यन्ति सुतास्त्रयः ॥२१

इसके अनन्तर परम विनीत ब्रह्मा के आत्मज अत्रि विस्मित होकर ब्रह्मा विष्णु और महेश इन देवों से हाथ जोड़ कर कहने लगे ॥१६॥ अत्रि मुनि ने कहा—हे ब्रह्मन् ! हे विष्णो ! हे महेश्वर ! आप लोग इस समस्त विश्व के परम पूज्य माने जाते हैं और इस जगत् के आप प्रभु ईश्वर तथा सृजन, पोषण और विनाश के करने वाले हैं ॥१७॥ मैंने तो अपने पुत्र की प्राप्ति के लिए केवल शिव का ही स्त्री के सहित तप में ध्यान स्मरण किया था क्योंकि शंकर संसार में ईश्वर विख्यात हैं ।१८। हे वरदाताओं में श्रेष्ठ ! अब आप तीनों ही देवता यहाँ किस कारण से आये हैं ? पहिले मेरे संशय को मिटा कर फिर वरदान देने की कृपा

करें ॥१९॥ हे मुने ! अत्रि के इन वचनों को सुनकर इसका उत्तर उन तीनों देवों ने यह दिया कि हे अत्रि मुने ! तुमने जो भी हृदय में संकल्प किया है वह उसी तरह से पूर्ण होगा ॥२०॥ तीनों देवों ने कहा—हम तीनों ब्रह्मा, विष्णु और महेश समान वर देने वाले हैं। इसलिए हमारे अंशों से जन्म ग्रहण करने वाले तुम्हारे एक नहीं तीन पुत्र होंगे ॥२१॥

विदिता भुवने सर्वे पित्रोः कीर्तिविवर्द्धनाः ।
इत्युक्त्वा ते त्रयो देवाः स्वधामानि ययुर्मुदा ॥२२
वरं लब्ध्वा मुनिः सोऽथ जगाम स्वाश्रमं मुदा ।
युतोऽनुसूयया प्रीतो ब्रह्मानन्दप्रदो मुने ॥२३
अथ ब्रह्मा हरिः शम्भुरवतेरुः स्त्रियां ततः ।
पुत्ररूपैः प्रसन्नास्ते नानालीलाप्रकाशकाः ॥२४
विधेरंशाद्विधुजज्ञेऽनसूयायां मुनीश्वरात् ।
आविर्बभूवोदधितः क्षिप्तो देवैः स एव हि ॥२५
विष्णोरंशात्स्त्रियां तस्यामत्रेर्दत्तो व्यजायत ।
सन्यासपद्धतियेन वर्द्धिता परमा मुने ॥२६
दुर्वासा मुनिशार्दूलः शिवांशान्मुनिसत्तमः ।
जज्ञे तस्यां स्त्रियामत्रेर्वरधर्मप्रवर्तकः ॥२७
भूत्वा रुद्रश्च दुर्वासा ब्रह्मतेजोविवर्द्धनः ।
चक्रे धर्मपरीक्षाञ्च बहूनां स दयापरः ॥२८

वे तीनों पुत्र ऐसे होंगे जो अपने माता-पिता की कीर्त्ति की वृद्धि करेंगे इतना कह कर वे तीनों देव प्रसन्नतापूर्वक अपने अपने निवास स्थानों को चले गये।२२। हे मुनिवर ! इसके उपरान्त अत्रि मुनिजी इच्छित वर पाकर आनन्द अनसूया के सहित प्रसन्नचित्त से अपने स्थानको चले गये और ब्रह्मानन्द को पाने लगे ॥२३॥ इसके पश्चात् ब्रह्मा, विष्णु महेश अत्रि की पत्नी अनसूया के उदर से पुत्र रूप में परम प्रसन्न तथा बिविध लीलाओं के रचने वाले उत्पन्न हुए ॥२४॥ अनसूया के गर्भ से अत्रि के द्वारा ब्रह्माजी के अंश से चन्द्रमा उत्पन्न हुआ जो कि देवों के द्वारा फेंके जाने पर फिर समुद्र से प्रकट हुआ था ॥२५॥ भगवान् विष्णु के अंग से अनसूया

में अत्रि के द्वारा दत्तात्रेय भगवान् उद्भूत हुए जिनने जगत् में संन्यास की विशाल पद्धति का प्रचार किया था ॥२६। हे मुनिवर ! भगवान् शंकर के अंश से अनसूया की कुक्षि से धर्म के श्रेष्ठ प्रवर्तक दुर्वासा उत्पन्न हुए ॥२७॥ भगवान् महेश्वर ने ब्रह्मतेज की वृद्धि करने वाले दुर्वासा के स्वरूप से समुत्पन्न होकर दयालुता के साथ बहुतों की धर्मनिष्ठा की जाँच की थी ॥२८॥

सूर्य्यवंशे समुत्पन्नो योऽम्बरीषो नृपोऽभवत् ।
तत्परीक्षामकार्षीत्स तां शृणु त्वं मुनीश्वर ॥२९
सोऽम्बरीषो नृपवरः सप्तद्वीपरसापतिः ।
नियमं हि चकारासावेकादश्यां व्रते दृढम् ॥३०
एकादश्या व्रतं कृत्वा द्वादश्यां चैव पारणाम् ।
करिष्यामीति सुदृढसकल्पस्तु नराधिपः ॥३१
ज्ञात्वा तन्नियमं तस्य दुर्वासा मुनिसत्तमः ।
तदन्तिकं गतिः शिष्यैर्बहुभिः शंकरांशजः ॥३२
पारणे द्वादशीं स्वल्पां ज्ञात्वा यावत्स भोजनम् ।
कर्त्तुंव्यवसितस्तावदागतं स न्यमन्त्रयत् ॥३३
ततः स्नानार्थमगमद्दुर्वासाः शिष्यसंयुतः ।
विलम्बं कृतवांस्तत्र परीक्षार्थं मुनिर्बहु ॥३४
धर्मविघ्नं तदा ज्ञात्वा स नृपः शास्त्रशासनात् ।
जलं प्राश्य स्थितस्तत्र तदागमनकांक्षया ॥३५

हे मुनीश्वर ! सूर्यवंश में समुत्पन्न परम धार्मिक राजा अम्बरीष की धर्म परीक्षा इन्हीं दुर्वासा मुनि ने की थी, उस चरित्र को मैं सुनाता हूँ । तुम उसे श्रवण करो ॥२९॥ राजा अम्बरीष विशाल सातद्वीप की भूमि का अधीश्वर था । एकादशी के दिन सविधि उपवास करने का उसका बहुत ही दृढ़ नियम था ॥३०॥ राजा अम्बरीष का ऐसा प्रण था कि मैं सदा एकादशी में उपवास करके द्वादशी में ही पारण किया करूँगा ॥३१॥ भगवान् शंकर के अंश से समुत्पन्न हुए

दुर्वासा मुनि ने राजा के इस दृढ़ संकल्प को जानकर अपने शिष्य-वर्ग के साथ राजा अम्बरीष के यहाँ पदार्पण किया ॥३२॥ अम्बरीष द्वादशी तिथि का थोड़ा सा ही शेष समय जानकर अपने एकादशी व्रत का पारण करने ही वाले थे कि वहाँ दुर्वासा पहुँच गये। राजा ने उनको निमन्त्रण दे दिया था ॥३३॥ राजा का निमन्त्रण स्वीकार कर दुर्वासा शिष्यों के सहित स्नानादि करने को चले गये। दुर्वासा मुनि ने राजा की दृढ़ता की परीक्षा करने के हेतु से वहाँ जान बूझकर अधिक विलम्ब कर दिया ॥३४॥ राजा ने अपने धर्म में विघ्न समझकर शास्त्र की आज्ञा के अनुसार जल ग्रहण कर पारण कर लिया और दुर्वासा की प्रतीक्षा में भोजन नहीं किया ॥३५॥

एतस्मिन्नंतरे तत्र दुर्वासा मुनिरागतः ।
कृताशनं नृपं ज्ञात्वा परीक्षार्थं धृताकृतिः ॥३६
चु क्रोधाति नृपे तस्मिन्परीक्षार्थं वृषस्य सः ।
प्रोवाच वचनं तूग्रं स मुनिः शंकरांशजः ॥३७
मां निमन्त्र्य नृपाभोज्य जलं पीतं त्वयाधम ।
दर्शयामि फलं तस्य दुष्टदण्डधरो ह्यहम् ॥३८
इत्युक्त्वा क्रोधताम्राक्षो नृपं दग्धुं समद्यतः ।
समुत्तस्थौ द्रुतं चक्रं तत्स्थं रक्षार्थमैश्वरम् ॥३९
प्रजज्वालाति तं चक्रंमुनिं दग्धुं सुदर्शनम् ।
शिवरूपं तमज्ञात्वा शिवमायाविमोहितम् ॥४०
एतस्मिन्नंतरे व्योमवाण्युवाचाशरीरिणी ।
अम्बरीषं महात्मानं ब्रह्मभक्तं च वैष्णवम् ॥४१
सुदर्शनमिदं चक्रं हरये शम्भुनार्पितम् ।
शांत कुरु प्रज्वलितमद्य दुर्वाससे नृप ॥४२

उसी समय मुनिराज दुर्वासा वहाँ आगये और राजा को भोजन किया हुआ समझकर उस पर परीक्षा के लिए अत्यधिक क्रोधित हुए ॥३६॥ शिव के अंशावतार दुर्वासा मुनि धर्म की जाँच करते हुए राजा से रोषावेश में आकर कठोर वचन कहने लगे ॥३७॥ दुर्वासा ने राजा

अम्बरीष से कहा—अरे अधम नृप तूने ! मुझे तो भोजन का निमन्त्रण दे दिया और मुझे भोजन कराने के पूर्व ही जलपान कर लिया । मैं तुझे इसका फल दिखाता हूँ क्योंकि मैं तुझ जैसे दुष्टों को दण्ड देने वाला हूँ ॥३८॥ क्रोध से अरुण नेत्र वाले ऋषि इतना कहकर राजा को भस्मीभूत करने को उद्यत हुए थे कि नृप के समीप स्थित सुदर्शन चक्र ने प्रकट होकर उसकी रक्षा की ॥३९॥ शिव की माया से मोहित होकर दुर्वासा को शिव का ही रूप समझ कर मुनि को दग्ध करने के लिए सुदर्शन चक्र प्रज्ज्वलित रूप वाला हो गया ॥४०॥ उसी समय परम वैष्णव और ब्राह्मणों के भक्त महात्मा अम्बरीष से बिना शरीर वाली व्योम वाणी ने कहा—हे नृप ! इस समय दुर्वासा को भस्म करने के लिये परम प्रज्ज्वलित शिव से ही प्राप्त भगवान् विष्णु के इस सुदर्शन चक्र को प्रार्थना द्वारा शान्त कर दो ॥४१–४२॥

दुर्वासाऽयं शिवः साक्षाद्यच्चक्रं हरयेऽर्पितम् ।
एवं साधारणमुनिं न जानीहि नृपोत्तम ॥४३
तव धर्मपरीक्षार्थमागतोऽयं मुनीश्वरः ।
शरणं याहि तस्याशु भविष्यत्यन्यथा लयः ॥४४
इत्युक्त्वा च नभोवाणी विरराम मुनीश्वर ।
अस्तावीत्स हरांशं तमम्बरीषोऽपि चादरात् ॥४५
यद्यस्ति दत्तमिष्टं च स्वधर्मो वा स्वनुष्ठितः ।
कुलं नो विप्रदैवं चेद्धरेरस्त्रं प्रशाम्यतु ॥४६
यदि नो भगवान्प्रीतो मद्भक्तो भक्तवत्सलः ।
सुदर्शनमिदं चास्त्रं प्रशाम्यतु विशेषतः ॥४७
इति स्तुवति रुद्राग्रे शैवं चक्रं सुदर्शनम् ।
अशाम्यत्सर्वथा ज्ञात्वा तं शिवांशं सुलब्धीः ॥४८

हे नृपश्रेष्ठ ! यह दुर्वासा मुनि साक्षात् महेश्वर ही हैं । इन्हीं ने इस सुदर्शन चक्र को विष्णु के लिए दिया था । इन दुर्वासा को कोई सामान्य मुनि मत समझो ॥४३॥ इस समय यह ऋषि तुम्हारी धर्म परीक्षा करने केलिए ही उपस्थित हुये हैं । अब तुम इनकी शरण में जाओ अन्यथा

प्रलय हो जायगा ॥४४॥ नन्दीश्वर ने कहा—हे मुनीश्वर ! इतना कहकर आकाशवाणी शान्त हो गई और राजा अम्बरीष ने शिव के अंश स्वरूप दुर्वासा की स्तुति करना आरम्भ कर दिया ॥४५॥ राजा अम्बरीष ने प्रार्थना की—यदि आपने मुझे वरदान प्रदान किया है किम्बा मैंने अपना धर्मोचित अनुष्ठान किया है, यदि मेरा कुल देवगण और ब्राह्मण वर्ग का भक्त है तो मेरा विनयपूर्ण निवेदन है कि भगवान् विष्णु का अस्त्र सुदर्शन चक्र अब शान्त हो जावे ॥४६॥ यदि मेरे ऊपर मेरे भक्त वत्सत भगवान् परम प्रसन्न हैं तो मेरी प्रार्थना है कि यह सुदर्शन देव विशेष रूप से अब शान्त हो जाय ॥४७॥ नन्दीश्वर ने कहा—हे बुद्धिशालिन् ! इस तरह शिव के समक्ष में अम्बरीष के द्वारा स्तुति किये जाने पर शिव के द्वारा प्रदान किया हुआ सुदर्शन चक्र दुर्वासा को शिव का अंश समझ कर उसी समय शान्त हो गया ॥४८॥

अथाम्बरीषः स नृपः प्रणनाम च तं मुनिम् ।
शिवावतारं संज्ञाय स्वपरीक्षार्थमागतम् ॥४९
सुप्रसन्नो बभूवाथ स मुनिः शंकरांशजा ।
भुक्त्वा तस्मै वरं दत्त्वा स्वाभीष्टं स्वालयं ययौ ॥५०
अम्बरीषपरीक्षायां दुर्वासश्चरितं मुने ।
प्रोक्तमन्यच्चरित्रं त्वं शृणु तस्य मुनीश्वर ॥५१
पुनर्दाशरथेश्चक्रे परीक्षां नियमेन वै ।
मुनिरूपेण कालेन यः कृतो नियमो मुने ॥५२
तदैव मुनिना तेन सौमित्रिः प्रेषितो हठात् ।
तं तत्याज द्रुतं रामो बन्धुप्रणवशान्मुने ॥५३
सा कथा विहिता लोके मुनिभिर्बहुधोदितः ।
नातो मे विस्तरात्प्रोक्ता ज्ञाता यत्सर्वथा बुधैः ॥५४
नियमं सुदृढ़ दृष्ट्वा सुप्रसन्नोऽभवन्मुनिः ।
दुर्वासाः सुप्रसन्नात्मा वरं तस्मै प्रदत्तवान् ॥५५
श्रीकृष्णनियमस्थापि परीक्षां स चकार ह ।
तां शृणुत्वं मुनिश्रेष्ठ कथयामि कथां च ताम ॥५६

राजा ने इसके अनन्तर अपनी परीक्षा करने के लिए ही समागत दुर्वासा मुनि को भगवान् शिव का अंश समझ कर उन्हें सादर प्रणाम किया ॥४९॥ उस समय शिव के अंश से उत्पन्न होने वाले दुर्वासा अम्बरीष पर बहुत अधिक प्रसन्न हुए और उसके भोजन को स्वीकार कर अभीष्ट स्थान को वापिस चले गये ॥५०॥ हे मुनीश्वर ! मैंने अभी तो यह अम्बरीष की परीक्षा करने से सम्बन्धित दुर्वासा के चरित्र का वर्णन किया है । अब इनके अन्य चरित्र को मैं सुनाता हूँ । उसे श्रवण करो ॥५१॥ हे मुने ! इसके अनन्तर मुनिरूप को धारण करने वाले दुर्वासा ने भगवान् श्रीराम की परीक्षा करने का निश्चय किया । श्रीराम ने कालरूप मुनि से यह नियम निश्चित किया था कि हमारे आपके सम्वाद के समय में कोई भी न आने पावेगा ॥५२॥ दुर्वासा मुनि ने यह जानकर श्रीराम का नियम भंग करने के लिये हठ करके उनके समीप में लक्ष्मण को भेज दिया था और श्रीराम ने अपने किये प्रण के वशीभूत होने के कारण शीघ्र ही अपने भाई लक्ष्मण का परित्याग कर दिया ॥५३॥ यह कथा बहुधा मुनिगण के द्वारा कही हुई है और परम प्रसिद्ध भी है । इसे प्रायः सभी विद्वान भलीभाँति जानते हैं । अतएव विस्तार से मैं इसका वर्णन नहीं कर रहा हूँ ॥५४॥ श्रीरामचन्द्रजी के अत्यन्त दृढ़ नियम को देखकर महर्षि दुर्वासा को बहुत ही प्रसन्नता हुई और इसके लिये श्रीराघवेन्द्र को वरदान भी दिया ॥५५॥ हे मुनिवर ! इसी प्रकार दुर्वासा मुनि ने एकबार श्रीकृष्ण के नियम की परीक्षा की थी । मैं उस कथा को आपको सुनाता हूँ । तुम श्रवण करो ॥५६॥

ब्रह्मप्रार्थनया विष्णुर्वसुदेवसुतोऽभवत् ।
धराभारावतारार्थं साधूनां रक्षणाय च ॥५७
हत्वा दुष्टान्महापापान्ब्रह्मद्रोहकरान्खलान् ।
ररक्ष निखिलान्साधून्ब्राह्मणान्कृष्णनामभाक् ॥५८
ब्रह्मभक्ति चकारासौ स कृष्णो वसुदेवजः ।
नित्यं हि भोजयामास सुरसान्ब्राह्मणान्बहून् ॥५९
ब्रह्मभक्तो विशेषेण कृष्णश्चेति प्रथामगात ।

संद्रष्टुकामः स मनिः कृष्णान्तिकमगान्मुने ।।६०
रुक्मिणीसहितं कृष्णं मग्नं कृत्वा रथे स्वयम् ।
संयोज्य संस्थितो वाहं सुप्रसन्न उवाह तम् ।।६१
मुनी रथात्समुत्तोर्य्य दृष्ट्वा तां दृढतां पराम् ।
तस्मै भूत्वा सुप्रसन्नो वज्राङ्गत्ववरं ददौ ।।६२

प्रह्माजी की प्रार्थना पर भगवान् विष्णु ने पृथ्वी का भार हल्का करने और साधु पुरुषों की रक्षा करने के लिए वसुदेव के पुत्र होकर अवतार लिया था ।।५७।। श्रीकृष्ण वासुदेव ने महान् पापी दुरात्माओं तथा ब्राह्मणों से द्रोह करने वाले खलों का संहार कर समस्त साधु ब्राह्मणों का त्राण किया ।।५८।। वासुदेव श्रीकृष्ण ब्राह्मणों के अत्यन्त भक्त थे और अनेकों ब्राह्मणों को प्रतिदिन सुन्दर स्वादिष्ट रस वाले भोजन कराया करते थे ।।५९।। हे मुनिश्रेष्ठ! श्रीकृष्ण ब्राह्मणों की विशेष भक्ति करने वाले हैं ऐसी उनकी ख्याति सुन उनकी भी परीक्षा करने के उद्देश्य से दुर्वासा मुनि उनके पास पहुँचे ।।६०।। रुक्मिणी के सहित श्रीकृष्ण को अपने रथ में छोड़कर उसमें बैठ परम प्रसन्न होकर कहने लगे ।।६१।। दुर्वासा रथ से उतर आये और श्रीकृष्ण की इस अत्यन्त दृढ़ता से बहुत प्रसन्न होकर उनको वज्र तुल्य अंग हो जाने का वरदान मुनि ने दिया था ।।६२।।

द्युनद्यामोकदा स्नानं कुर्वन्नग्नो बभूव ह ।
लज्जितोऽभून्मुनिश्रेष्ठो दुर्वासाः कौतुकी मुने ।।६३
तज्ज्ञात्वा द्रौपदी स्नानं कुर्वती तत्र चादरात् ।
तल्लज्जां छादयामास भिन्नस्वांचलदानतः ।।६४
तदादाय प्रवाहेनागतं स्वनिकटं मुनिः ।
तेनाच्छाद्य स्वगुह्यं च तस्यै तुष्टो बभूव सः ।।६५
द्रौपद्यै च वरं प्रादात्तश्चलविवर्द्धनम् ।
पाण्डवान्सुखिनश्चक्रे द्रौपदी तद्वरात्पुनः ।।६६
सडिम्भौ नृपौ कौचित्स्वावमानकरौ खलौ ।
दत्त्वा निदेशं च हरेर्नाशयामांस स प्रभुः ।।६७

ब्रह्मतेजोविशेषेण स्थापयामास भूतले ।
संन्यासपद्धतिञ्चैव यथाशास्त्रविधिक्रमम् ॥६८
बहूनुद्धारयामास सूपदेशं विबोध्य च ।
ज्ञानं दत्त्वा विशेषेण बहून्मुक्तांश्चकार सः ॥६९
इत्थं चक्रेस दुर्वासा विचित्रं चरितं बहु ।
धन्यं यशस्यमायुष्यं शृण्वतः सर्वकामदम् ॥७०
य इदं शृणुयाद्भक्त्या दुर्वासश्चरितं मुदा ।
श्रावयेद्वा परान्यश्च स सुखीह परत्र च ॥७१

हे मुने ! एकबार अत्यन्त कौतुक करने वाले मुनियों में श्रेष्ठ दुर्वासा बिल्कुल नग्न होकर भागीरथी में स्नान करने के कारण बहुत लज्जित हुए ॥६३॥ उस समय द्रौपदी भी वहाँ स्नान कर रही थी। इसने मुनि को लज्जायुक्त देखकर उन्हें अपना वस्त्र फाड़कर सादर समर्पित किया और उनकी लज्जा दूर की ॥६४॥ उस समय जल के बहाव में बहकर आते हुए वस्त्र को प्राप्त कर मुनि ने अपने योग्य अंग का आच्छादान किया और इस उपकार के लिए द्रोपदी पर बहुत प्रसन्न हुए ॥६५॥ दुर्वासा ने द्रौपदी को उसके वस्त्र की वृद्धि हो जाने का वरदान दिया। इस वरदान के प्रभाव से द्रौपदी ने पांडवों को सुखी बनाया था ॥६६॥ हंसडिम्भ नामक एक राजा था। वह बहुत दुष्ट और परम स्वाभिमानी था। इसको भगवान् विष्णु का सन्देश देकर महर्षि दुर्वासा ने नष्ट कर दिया ॥६७॥ दुर्वासा ने ब्रह्म तेज का विस्तार भूमि पर विशेष रूप से किया गया था और शास्त्रों के विधान के अनुकूल सांसारिक पद्धति का पूर्णतया प्रसार किया ॥६८॥ मुनि ने अपने सुन्दर उपदेशों द्वारा ज्ञान देकर अनेकों का उद्धार एवं विशेष रूप से मुक्त कर दिया ॥६९॥ दुर्वासा मुनि के इस प्रकार से अनेक अत्यन्त अद्भुत चरित्र हैं और सुनने पर समस्त कामनाओं की पूर्ति करने वाले हैं ॥७०॥ जो पुरुष दुर्वासा मुनि के इस चरित्र को भक्ति के साथ आनन्दपूर्वक सुनता या सुनाता है वह इस लोक और परलोक में दोनों जगह सुख प्राप्त किया करता है ॥७१॥

## ॥ दधीचि का अस्थिदान ॥

एकदा निर्जराः सर्वे वासवाद्या मुनीश्वर ।
वृत्रासुरसहायैश्च दैत्यैरासन्पराजिताः ॥१
स्वानि स्वानि वरास्त्राणि दधीचस्याश्रमेऽखिलाः ।
निः क्षिप्य सहसा सद्योऽभवन् देवाः पराजिताः ॥२
तदा सर्वे सुराः सेन्द्रा वध्यमानास्तथर्षयः ।
ब्रह्मलोकं गताः शीघ्रं प्रोचुः स्वं व्यसनं च तत् ॥३
तच्छ्रुत्वा देववचनं ब्रह्मा लोकपितामहः ।
सर्वं शशंस तत्त्वेन त्वष्टुश्चैव चिकीर्षितम् ॥४
भवद्वधार्थं जनितस्त्वष्ट्राऽयं तपसाऽसुरः ।
वृत्रो नाम महातेजाः सर्वदैत्याधिपो महान् ॥५
अथ प्रयत्नः क्रियतां भवेदस्य वधो यथा ।
तत्रोपायं शृणु प्राज्ञ धर्महेतोर्वदामि ते ॥६
महामुनिर्दधीचिर्यः स तपस्वी जितेन्द्रियः ।
लेभे शिवं समाराध्य वज्रास्थित्ववरम्पुरा ॥७

नन्दीश्वर ने कहा हे मुनिराज ! एकबार इन्द्र आदि समस्त देवगण वृत्रासुर की सहायता करने वाले दैत्यों से युद्ध में पराजित हो गये और सब ने अपने अस्त्रों को दधीचि मुनि के आश्रम में फेंक दिया था ॥१—२॥ उस समय समस्त देववृन्द्र इन्द्र को साथ लेकर और अत्यन्त पीड़ित ऋषि लोग एकत्रित होकर शीघ्र ही ब्रह्मा जी के पास गए और सब ने ही अपने दुःख की ब्रह्मा जी से प्रार्थना की ॥३॥ समस्त जगत् के पितामह ब्रह्मा जी देवगण के वचनों को श्रवण कर त्वष्टा द्वारा करने वाली इच्छा को तात्विक रूप से देवों को कहने लगे ॥४॥ ब्रह्मा जी ने कहा— वृत्रासुर महान् तेजस्वी और समस्त दैत्यों का स्वामी है । इसको त्वष्टा दैत्य ने तुम सब को मारने के लिए ही तपस्ता करके पैदा किया है ॥५॥ हे प्राज्ञ ! अब जिस रीति से इसका वध हो सकता है वही उपाय धर्म के हित के विचार से मैं तुम को बतलाता हूँ । तुम सब सुन

लो ॥६॥ पहिले किसी समय में परम तपस्वी-जितेन्द्रिय महामुनि दधीचि ऋषि ने भगवान् महेश्वर की आराधना से वज्र के समान हड्डी वाला हो जाने का वरदान प्राप्त किया है ॥७॥

तस्यास्थीन्येव याचध्वं स दास्यति न संशयः ।
निर्माय तैर्दण्डवज्रं वृत्रं जहि न संशयः ॥८
तच्छ्रुत्वा ब्रह्मवचनं शक्रो गुरुसमन्वितः ।
अगच्छत्सामरः सद्यो दधीच्याश्रममुत्तमम् ॥९
दृष्ट्वा तत्र मुनिं शक्रः सुवर्चान्वितमादरात् ।
ननाम साञ्जलिर्नम्रः सगुरुः सामरश्चतम् ॥१०
तदभिप्रायमाज्ञाय स मुनिर्बुधसत्तमः ।
स्वपत्नीं प्रेषयामास सुवर्चां स्वाश्रमान्तरम् ॥११
ततः सदेवराजश्चसामरः स्वार्थसाधकः ।
अर्थशास्त्रो भूत्वा मुनीशं वाक्यमब्रवीत् ॥१२
त्वष्ट्रा विप्रकृताः सर्वे वयं देवास्तथर्षयः ।
शरण्यं त्वां महाशैवं दातारं शरणं गताः ॥१३
स्वास्थीनि देहि नो विप्र महावज्रमयानि हि ।
अस्थ्ना ते स्वपवि कृत्वा हनिष्यामि सुरद्रुहम् ॥१४

सो अब तुम किसी प्रकार से उनकी अस्थियों की याचना करो। वे निस्सन्देह अस्थियाँ दे देंगे। उन से दण्ड वज्र की रचना कर वृत्रासुर का बिना किसी सन्देह के वध करो ॥८॥ नन्दीश्वर ने कहा—ब्रह्मा जी के इन वचनों को सुनकर गुरु के सहित तथा समस्त देवों के सहित इन्द्र ने मुनि के आश्रम के लिये प्रस्थान कर दिया ॥९॥ वहाँ अपनी सुवर्चा के साथ विराजमान दधीचि मुनि को देखकर सब ने आदरपूर्वक हाथ जोड़ कर प्रणाम किया ॥१०॥ उस वक्त विद्वद्वर दधीचि ने उन के हार्दिक अभिप्राय को जान लिया और सुवर्चा को आश्रम के अन्दर भेज दिया ॥११॥ उस समय परम स्वार्थी देव स्वामी इन्द्र अर्थशास्त्र में परायण होकर मुनि से प्रार्थना करने लगा ॥१२॥ देवराज इन्द्र ने कहा—हम सब देवगण तथा ऋषि वृन्द त्वष्टा के द्वारा सताये हुए परम

दुःखित होकर अति दानशील महाशिवभक्त और शरण में आये हुओं पर दया करने वाले आपकी शरण में प्राप्त हुए हैं ॥१३॥ हे विप्रवर ! आप अपनी वज्र तुल्य अस्थियाँ हमको प्रदान करें जिनसे हम वज्र दण्ड निर्माण कर देवशत्रु इस वृत्रासुर का वध कर सकें ॥१४॥

इत्युक्तस्तेन स मनिः परोपकरणे रतः ।
ध्यात्वा शिवं स्वनाथं हि विससर्जकलेवरम् ॥१५
ब्रह्मलोक गतः सद्यः स मुनिर्ध्वस्तबन्धनः ।
पुष्पवृष्टिरभूत्तत्र सर्वे विस्मयमागता ॥१६
अथ गां सुरभिं शक्र आहूयाशु ह्यलेहयत् ।
अस्त्रनिर्मितये त्वाष्ट्रं निर्दिदेश तदस्थिभिः ॥१७
विश्वकर्मा तदाज्ञप्तश्चवलूपेऽस्त्राणि कृत्स्नशः ।
तदस्थिभिर्वज्रामयैः सुदृढैः शिवदर्चसा ॥१८
तस्य वंशोद्भवं वज्रं शरो ब्रह्मशिरोस्तथा ।
अन्यास्थिभिर्बहूनि स्वपराण्यस्त्राणि निर्ममे ॥१९
तमिन्द्रो वज्रमुद्यम्य वर्द्धितः शिववचसा ।
वृत्रमभ्यद्रवत्क्रुद्धो मुने रुद्र इवान्तकम् ॥२०
ततः शक्रः सुसन्नद्धस्तेन वज्रेण संद्रुतम ।
उच्चकर्त शिरो वार्त्रं गिरिश्रृंगमिवोजसा ॥२१
तदा समुत्सवस्नात बभूव त्रिदिवौकसाम् ।
तुष्टुवुर्निर्जराः शक्रम्पेतुः कुसुमवृष्टयः ॥२२

देवों की इस प्रार्थना को सुनते ही परोपकार में तत्पर दधीचि मुनि ने भगवान् शंकर के चरणों का ध्यान करके तुरन्त ही अपने शरीर का त्याग कर दिया ॥१५॥ दधीचि मुनि समस्त बन्धनों से विमुक्त होकर शीघ्र ही ब्रह्मलोक में गये । उस समय आकाश से पुष्प वर्षा होने लगी और सब को बहुत अधिक आश्चर्य हुआ ॥१६॥ उसी समय महेन्द्र ने कामधेनु को आज्ञा देकर ऋषि की सब अस्थियाँ निकलवा लीं और उनसे वज्रदण्ड का निर्माण करने के लिये त्वष्टा को आदेश दे दिया ॥१७॥ विश्वकर्मा ने आज्ञा प्राप्त होते ही शिव के तेज से परिपूर्ण परम पुष्ट

वज्रमय अस्त्र उन अस्थियों से बना दिया ॥१८॥ उसके वंश से समुत्पन्न हुआ वज्र तथा ब्रह्मा के शिर का त्राण हुआ और उन अस्थियों से अपने और पराये अस्त्र बनाये गए ॥१९॥ हे मुने ! तब फिर इन्द्रदेव शिव के तेज से सुसम्पन्न होकर उस वज्र को उठाते हुये क्रोध में भरकर शिव के ही समान वृत्रासुर पर टूट पड़ा ॥२०॥ इन्द्र ने बलपूर्वक उस वज्र के द्वारा शीघ्र ही वृत्रासुर के मस्तक को पर्वत शिखर के तुल्य काटकर फेंक दिया ॥२१॥ हे तात ! वृत्रासुर का वध हो जाने पर देवगण अत्यन्त सन्तुष्ट होकर महाआनन्दोत्सव मनाने लगे और इन्द्रदेव के ऊपर अन्तरिक्ष से पुष्पों की वर्षा हुई ॥२२॥

## ॥ पिप्पलाद का विवाह और शनि पीड़ा निवारण ॥

एवं लीलावतारो हि शंकरस्य महाप्रभोः ।
पिप्पलादो मुनिवरो नानालीलाकरः प्रभुः ॥१
येन दत्तो वरः प्रीत्या लोकेभ्यो हि दयालुना ।
दृष्ट्वा लोके शनेः पीडां सर्वेषामनिवारिणीम् ॥२
षोडशाब्दावधि नृणां जन्मतो न भवेच्च सा ।
तथा च शिवभक्तानां सत्यमेतद्धि मे वचः ॥३
अथानादृत्य मद्वाक्यं कुर्यात्पीडां शनिः क्वचित् ।
तेषां नृणां तदा स स्याद्भस्मसान्न हि संशयः ॥४
इति तद्भयतस्तात विकृतोऽपि शनैश्चरः ।
तेषां न कुरुते पीडां कदाचिद्ग्रहसत्तमः ॥५
इति लीलामनुष्यस्य पिप्पलादस्य सन्मुनेः ।
कथितं सुचरित्रं ते सर्वकामफलप्रदम् ॥६
गाधिश्च कौशिकश्चैव पिप्पलादो महामनिः ।
शनैश्चरकृतां पीडां नाशयन्ति स्मृतास्त्रयः ॥७

यह महाप्रभु महेश्वर का पिप्पलाद के स्वरूप में लीलावतार हुआ क्योंकि वह नाना प्रकार की लीलाओं के करने वाला था ॥१॥ दयालु पिप्पलाद ने संसार में किसी से भी निवारण न करने के योग्य शनि की

पीड़ा को देखते हुए परम प्रीति के साथ मनुष्य को वरदान दिया था ।२। पिप्पलाद ने वर यह दिया कि जन्म से आरम्भ कर सोलह वर्ष की अवस्था तक शिव की भक्ति करने वालों की शनैश्चर की कोई भी पीड़ा नहीं सतायेगी, ऐसा मेरा वचन सत्य है ।।३।। यदि मेरे वचन को न मानकर शनि किसी को भी पीड़ा देगा तो वह स्वयं भस्म हो जायगा इसमें कुछ भी सन्देह नहीं है ।।४।। हे तात ! इस तरह इनके भय से विकृत होकर शनिग्रह उनको कभी भी भूलकर कोई पीड़ा नहीं दिया करता है ।।५।। हे मुनिवर ! मैंने यह पिप्पलाद भगवान् की परम सुन्दर मानव लीला एवं रमणीय चरित्र तुमको सुना दिया है। यह समस्त कामनाओं के फल को प्रदान करने वाला है ।।६।। गधि, कौशिक और पिप्पलाद ये तीनों ही महामुनि हैं और शनिग्रह द्वारा उत्पन्न पीड़ा का उन्मूलन करने वाले होते हैं ।।७।।

## ।। शिव का ब्रह्मचारी रूप में अवतार ।।

सनत्कुमार सुप्रीत्या शिवस्य परमात्मनः ।
अवतारं शृणु विभोर्जटिलाह्वं सुपावनम् ।।१
पुरा सती दक्षकन्या त्यक्त्वा देह पितुमखे ।
स्वपित्राऽनादृता जज्ञे मेनायां हिमभूधरात् ।।२
सा गत्वा गहनेऽरण्ये तेपे सुविमलं तपः ।
शकरं पतिमिच्छन्ती सखीभ्यां संयुता शिवा ।।३
तत्तपः सुपरीक्षार्थं सप्तर्षीन्प्रैषयच्छिवः ।
तपःस्थानं तु पार्वत्या नानालीलाविशारदः ।।४
ते गत्वा तत्र मुनयः परीक्षां चक्रुरादरात् ।
तस्याः सुयत्नतो नैव समर्था ह्यभवंश्च ते ।।५
तत्रागत्य शिवं नत्वा वृत्तान्त च निवेद्य तत् ।
तदाज्ञां समनुप्राप्य स्वर्लोकं जग्मुरादरात् ।।६
गतेषु तेषु मुनिषु स्वस्थानं शंकरः स्वयम् ।
परीक्षितुं शिवावृत्तमैच्छत्सूतिकरः ।।७

नन्दीश्वर ने कहा—हे सनत्कुमार ! अब आप सर्वत्र व्यापक रहने

वाले परमात्मा शिव के जटिल नाम वाले परम पवित्र अवतार की कथा प्रीतिपूर्वक श्रवण करें ॥१॥ पहिले सती नाम वाली दक्ष प्रजापति की पुत्री ने अपने ही पिता के द्वारा अनादर प्राप्त करने पर पिता के यहाँ पर ही यज्ञस्थली में अपने शरीर का त्याग कर दिया और पुनः हिमवान् पर्वतराज के द्वारा उनकी पत्नी मेना के कुक्षि से उत्पन्न हुई थी ॥२॥ वह पार्वती अपने स्वामी शंकर को प्राप्त करने की इच्छा से सहेलियों के सहित घोर निर्जन एवं परम सघन वन में जाकर बहुत ही निर्मल तथा उग्र तपस्या करने में परायण हो गई ॥३॥ उस समय विविध प्रकार की लीला करने में प्रवीण भगवान् शिव ने पार्वती की तपश्चर्या का परीक्षण करने के लिये उस तपोवन में सप्त ऋषियों को भेजा था ॥४॥ वे ऋषि शिवाज्ञा को स्वीकार कर वहाँ पहुंचे और बहुत ही यत्नों द्वारा पार्वती की परीक्षा करने लगे किन्तु वास्तविक रूप से उस कार्य में वे समर्थ एवं सफल न हो सके ॥५॥ इसके अनन्तर वे सप्तऋषि वापिस शिव के पास लौट आये और प्रणामपूर्वक समस्त वृत्तान्त शिव को सुना दिया तथा शंकर की आज्ञा प्राप्त कर अपने-अपने स्थानों को चले गये ॥६॥ उत्पत्तिकर्त्ता प्रभु शिव ने उन ऋषियों के यथास्थान चले जाने के अनन्तर स्वयं ही पार्वती के मनोभाव की जाँच करने की इच्छा की ॥७॥

सुप्रसन्नस्तपस्वीच्छाशमनादयमीश्वरः ।
ब्रह्मचर्य्यस्वरूपोऽभूत्तदाऽद्भुततरः प्रभुः ॥८
अतीव स्थविरो विप्रदेहधारी स्वतेजसा ।
प्रज्वलन्मनसा हृष्टो दण्डी छत्री महोज्ज्वलः ॥९
धृत्वैवं जाटिलं रूपं जगाम गिरिजावनम् ।
अतिप्रीतियुतः शम्भुः शङ्करो भक्तवत्सलः ॥१०
तत्रापश्यत्स्थितां देवीं सखीभिः परिवारिताम् ।
त्रेदिकोपरि शुद्धान्तां शिवामिव विधोः कलाम् ॥११
शंभुर्निरीक्ष्य तां देवीं ब्रह्मचारिस्वरूपवान् ।
उपकण्ठं ययौ प्रीत्या चोत्मुखो भक्तवत्सलः ॥१२

आगतं सा तदा दृष्ट्वा ब्राह्मणं तेजसाऽद्भुतम् ।
अगेषु लोमशं शांत दण्डचर्मसमन्वितम् ।१३
ब्रह्मचर्य्यधरं वृद्धं जटिलं सकमण्डलुम् ।
अपूजयत्परप्रीत्या सर्वपूजोपहारकैः ।१४

तब परम प्रसन्न चित्त तपस्वी प्रभु शङ्कर ने अपनी इच्छा के अनुसार शान्तिमय एक अति अद्भुत ब्रह्मचारी का स्वरूप धारण किया ।८। बहुत वृद्ध ब्राह्मण का शरीर धारण करते हुए अपने तेज के प्रकाश से प्रज्ज्वलित तथा मन से प्रसन्न दण्ड तथा छत्र धारण कर बहुत ही उज्ज्वल वेष के धारी हुए ।९। ऐसे जटिल स्वरूप को धारण कर भक्त-वत्सल-कल्याण करने वाले शम्भु प्रीतिपूर्वक पार्वती के निकट तपोवन में गये ।१०। उस तपोवन में तपस्विनी पार्वती को वेदी के ऊपर विराजमान सखियों से घिरी हुई परम शुद्ध चन्द्रमा की कला के तुल्य संस्थित भगवान् शिव ने देखा ।११। एक ब्रह्मचारी का स्वरूप धारण करने वाले भक्तों पर प्रेम करने वाले भगवान् महेश्वर अत्यन्त उत्कण्ठा रखते हुए वहाँ पार्वती को देखकर उसके समीप में पहुँच गये ।१२। उस समय जगदम्बा पार्वती ने अद्भुत तेजस्वी, रामयुक्त अङ्गों वाले, परम शान्त रूपधारी, मृग-चर्म और दण्ड से युक्त वहाँ आगमन करते हुए ब्राह्मण का दर्शन किया ।१३। पार्वती ने उस ब्राह्मण को ब्रह्मचर्य से युक्त-वृद्ध और जटा एवं कमण्डलु धारण किये हुए देखकर अत्यन्त प्रीतिपूर्वक अर्चना की और समस्त सामग्री के द्वारा उसका समुचित सत्कार किया ।१४।

ततः सा पार्वती देवी पूजितं परया मुदा ।
कुशल पर्यपृच्छत्तं ब्रह्मचारिणमादरात् ।१५
ब्रह्मचारिस्वरूपेण कस्त्वं हि कुत आगतः ।
इदं वनं भासदति वद वेदविदां वर ।१६
इति पृष्ठस्तु पार्वत्या ब्रह्मचारी स वै द्विजः ।
प्रत्युवाच द्रुतं प्रीत्या शिवाभावपरीक्षया ।१७
अहमिच्छाभिगामी च ब्रह्मचारी द्विजश्च वै ।
तपस्वी सुखदोऽन्येषामुपकारी न संशयः ।१८

इत्युक्त्वा ब्रह्मचारी च शङ्करो भक्तवत्सलः ।
तस्थिवानुपकण्ठं स गोपायन्रूपमात्मनः ।१९।
किं ब्रवीमि महादेवि कथनीयं न विद्यते ।
महानर्थकरं वृत्तं दृश्यते विकृतं महत् ।२०
नवे वयसि सद्भोगसाधने सुखकारणे ।
महोपचारसद्भोगैर्वृथैव त्वं तपस्यसि ।२१
का त्वं कस्यासि तनया किमर्थं विजने वने ।
तपश्चरसि दुर्धर्षं मुनिभिः प्रयतात्मभिः ।२२

इसके अनन्तर पूजा में परायण होते हुए पार्वती ने आदरपूर्वक सादर उन समागत ब्रह्मचारी से कुशल प्रश्न किया ।१५। पार्वती ने कहा—हे वेदज्ञाताओं में परम श्रेष्ठ ! आप इस ब्रह्मचारी के स्वरूप में कौन हैं और इस समय कहाँ से पदार्पण किया है, जोकि इस वन को प्रकाश वाला कर रहे हो ? ।१६। नन्दीश्वर ने कहा—इस रीति से पार्वती के द्वारा प्रश्न किये जाने पर उस ब्रह्मचारी ब्राह्मण ने पार्वती की परीक्षा करने के कारण से शीघ्र ही उत्तर दिया ।१७। ब्रह्मचारी ने कहा—मैं स्वेच्छा से विचरण करने वाला तपस्वी तथा ब्रह्मचारी ब्राह्मण हूँ और दूसरों को सुखी बनाकर उनका उपकार किया करता हूँ ।१८। नन्दीश्वर ने कहा—इस तरह से भगवान् शङ्कर ने भक्तवत्सल ब्रह्मचारी के स्वरूप में अपने सही रूप को छिपाकर पार्वती के समीप में स्थिति की थी ।१९। उस समय ब्रह्मचारी ने पार्वती से कहा—हे देवि ! क्या बतलाऊँ ? कहने के योग्य बात नहीं है। मुझे यहाँ पर बहुत ही अनर्थपूर्ण महान् विकृत वृत्तान्त दिखाई दे रहा है ।२०। आप इस अपनी नई अवस्था में अत्यन्त सुन्दर एवं सुकोमल इस सुखोपभोगों के योग्य शरीर से महान् सुखोपचारों का त्याग कर व्यर्थ ही तपस्या कर रही हैं ।२४। क्या आप यह बता सकेंगी कि आप कौन हैं और किस उद्देश्य को लेकर इस भयावह निर्जन वन में जितेन्द्रियों के तुल्य कठिन तप कर रही हो ? ।२२।

इति तद्वचनं श्रुत्वा प्रहस्य परमेश्वरी ।
उद्वाच वचनं प्रीत्या ब्रह्मचारिणमुत्तमम् ।२३

शृणु विप्र ब्रह्मचारिन्मद्वृत्तमखिलं मुने ।
जन्म मे भारते वर्षे साम्प्रतं हिमवद्गृहे ।२४
पूर्वं दक्षगृहे जन्म सती शङ्करकामिनी ।
योगेन त्यक्तदेहाऽहं तातेन पतिनिन्दिना ।२५
अत्र जन्मनि संप्राप्तः सुपुण्येन येन शिवो द्विज ।
मां त्यक्त्वा भस्मसात्कृत्वा मन्मथं स जगाम ह ।२६
प्रयाते शङ्करे तापाद्व्रीडिताऽहं पितुर्गृहात् ।
आगच्छमत्र तपसे गुरुवाक्येन संयता ।२७
मनसा वचसा साक्षात्कर्मणा पतिभावतः ।
सत्यं ब्रवीमि नोऽसत्यं संवृतः शङ्करो मया ।२८

नन्दीश्वर ने कहा—इस प्रकार से ब्रह्मचारी के वेषधारी शङ्कर के इन वचनों को सुनकर पार्वती ने मुस्कराते हुए बड़े ही प्रेम के साथ ब्रह्मचारी को उत्तर देते हुए श्रेष्ठ वचन कहे ।२३। पार्वती ने कहा—हे ब्रह्मचारिन् ! हे मुनिवर ! आप जब सभी जानना चाहते हैं तो मैं अपना सभी पूरा हाल बताती हूँ। इस समय तो मेरे इस शरीर का जन्म गिरिराज हिमवान् के घर में हुआ है ।२४। इसके पूर्व मैं प्रजापति दक्ष की आत्मजा थी और भगवान् शंकर की पत्नी हुई थी । मेरे पतिदेव शिव की बुराई करने वाले पिता के यहाँ पर ही योग द्वारा अपने शरीर का त्याग मैंने कर दिया था ।२५। अब हे विप्रवर ! इस जन्म में परम महान् पुण्य से प्राप्त भगवान् शिव मुझे त्यागकर और कामदेव को भस्म करके चले गये हैं ।२६। शिव के त्याग से अति लज्जित होकर बहुत ही दुःखित मैं अपने पिता के घर को छोड़कर गुरु के वचनोपदेश से नियम लेकर इस वन में शिव-प्राप्ति के लिए यह तप कर रही हूँ ।२७। यह मेरी तपस्या मन-वचन और कर्म के द्वारा साक्षात् शिव स्वरूप पतिदेव को पाने के लिए ही है । मेरा यह कथन अक्षरशः सत्य है । इसमें लेशमात्र भी सन्देह नहीं है । इसके लिये मेरे साक्षी साक्षात् शिव ही है ।२८।

जानामि दुर्ल्लभं वस्तु कथं प्राप्य मया भवेत् ।
तथापि मनसौत्सुक्यात्तप्यते मे तपोऽधुना ।२९

हित्वेन्द्रप्रमुखान्देवान्विष्णुं ब्रह्माणमप्यहम् ।
पतिम्पिनाकरूपाणि वै प्राप्तुमिच्छामि सत्यतः ।२०
इत्येवं वचनं श्रुत्वा पार्वत्या हि सुनिश्चितम् ।
मुने स जटिलो रुद्रो विहसन्वाक्यमब्रवीत ।३१
हिमाचलसुते देवि का बुद्धिः स्वीकृता त्वया ।
रुद्रार्थं विबुधान्हित्वा करोषि विपुलं तपः ।३२
जानाम्यहं च तं रुद्रं शृणुत्व प्रवदामि ते ।
वृषध्वजः स रुद्रो हि विकृतात्मा जटाधरः ।३३
एकाकी च सदा नित्यं विरागी च विशेषतः ।
तस्मात्वं तेन रुद्रेण मनो योक्तुं न चार्हसि ।३४
सर्वं विरुद्धरूपादि तव देवि हरस्य च ।
मह्यं न रोचते ह्येतद्यदीच्छसि तथा कुरु ।३५

मैं खूब अच्छी तरह समझती हूं कि वह परम दुर्लभ वस्तु मुझे कैसे प्राप्त हो सकेगी, तो भी मेरे मन में उत्कण्ठा है और मैं उसी के लिए यह तपश्चर्या कर रही हूँ ।२९। मैं इन्द्र आदि समस्त देव, ब्रह्मा और विष्णु सबको त्याग कर केवल पिनाकधारी शिव को ही अपना पूज्य पति प्राप्त करने की उत्कट इच्छा रखती हूँ ।३०। नन्दीश्वर ने कहा—हे मुने ! उस समय पार्वती के परम निश्चय से परिपूर्ण इन वचनों को सुनकर जटिल रूपधारी रुद्रदेव हँसकर कहने लगे ।३१। जटिल ने कहा—हे हिमवान् की पुत्रि ! हे देवि ! तूने यह क्या अपनी बुद्धि बनाई है कि समस्त ऐश्वर्य वाले देवों को छोड़कर केवल एक शिव को ही अपना पति बनाने के लिये ऐसी कठोर तपस्या कर रही हो ? ।३२। हे देवि ! मैं भली भाँति उस रुद्र को जानता हूँ । वह रुद्र बैल पर तो सदा सवारी किया करता है और बहुत विकृत आत्मा वाला तथा जटा-जूट धारण करके रहा करता है ।३३। वह तो हमेशा अकेला ही रहता है और परम विरक्त है । इसलिए तुझको ऐसे वैरागी में अपना मन लगाना उचित नहीं जान पड़ता है ।३४। हे भगवति ! शिव का स्वरूप आदि सभी कुछ

तुम्हारे रूप-सौन्दर्य के बहुत विपरीत है। मुझे तो बिल्कुल भी अच्छा नहीं प्रतीत होता है। आगे तुम्हारी जो भी इच्छा हो वही करो।३५।

इत्युक्त्वा च पुनः रुद्रो ब्रह्मचारिस्वरूपवान्।
निनिन्द बहुधात्मानं तदग्रे तां परीक्षितुम्।३६
इच्छ्रुत्वा पार्वती देवी विप्रवाक्यं दुरासदम्
प्रत्युवाच महाक्रुद्धा शिवनिन्दापरं च तम्।३७
एतावद्धि मया ज्ञातं कश्चिद्धन्यो भविष्यति।
परन्तु सकलं ज्ञातमवध्यो दृश्यतेऽधुना।३८
ब्रह्मचारिस्वरूपेण कश्चित्वं धूर्त आगतः।
शिवनिन्दा कृता मूढ़ त्वया मन्युरभून्मम।३९
शिवं त्वं च न जानासि शिवात्वं हि बहिर्मुखः।
त्वत्पूजा च कृता यन्मे तस्मात्तापयुताऽभवम्।४०

नन्दीश्वर ने कहा—इतना कहने के बाद भी ब्रह्मचारी के वेष में उपस्थित शिव ने पार्वती की और अधिक परीक्षा करने की इच्छा से अनेक प्रकार से अपनी खूब निन्दा से भरी बातें कहीं।३६। तब तो सर्वथा न सहन करने के योग्य निन्दापूर्ण ब्राह्मण के वचनों को सुनकर पार्वती को बड़ा भारी क्रोध आ गया। अपने अभीष्ट देव शिव की निन्दा में तत्पर ब्राह्मण से पार्वती कहने लगीं।३७। हे ब्राह्मण! मैं तेरी इन बातों से इस निर्णय पर पहुँच गई हूँ कि तू मार देने के योग्य है किन्तु अब मैं बहुत कुछ विचार करके यह भी समझ गई हूँ कि इस समय तू अवध्य है।३८। हे मूर्ख! ऐसा मालूम होता है कि तू कोई बड़ा धूर्त है और ब्रह्मचारी बनकर यहाँ आ गया है। इस समय तूने भगवान् शिव की निन्दा की है अतएव इससे मुझे महान् क्रोध उत्पन्न हो गया।३९। तू शिव के सच्चे स्वरूप को बिल्कुल नहीं जानता है और शङ्कर से सर्वथा बहिर्मुख है। मैंने इस समय तेरी अर्चना एक ब्राह्मण समझकर की, इसका भी मेरे मन में बहुत ही सन्ताप हो रहा है।४०।

रेरे दुष्ट त्वया प्रोक्तमहं जानामि शङ्करम्।
निश्चयेन न विज्ञातः शिव एव परः प्रभुः।४१

यथा तथा भवेद्रुद्रो मायया बहुरूपवान् ।
मामाभीष्टप्रदोऽत्यन्तं निर्विकारः सताम्प्रियः ।४२
इत्युक्त्वास्ते शिवा देवी शिवतत्वं जगाद सा ।
यत्र ब्रह्मतपा द्ररुः कथ्यते निर्गुणोऽव्ययः ।४३
तदाकर्ण्य वचो देव्या ब्रह्मचारी स वै द्विजः ।
पुनर्वचनमादातं यावदेव प्रचक्रमे ।४४
प्रोवाच गिरिजा तावत्स्वसखीं विजयां द्रुतम् ।
शिवासक्तमनोवृत्ति शिवनिन्दापराङ्मुखी ।४५
वारणीयः प्रयत्नेन सख्ययं हि द्विजाधमः ।
पुनर्वक्तुमनाश्चायं शिवनिन्दां करिष्यति ।४६
न केवलं भवेत्पापं निन्दार्तुः शिवस्य हि ।
यो वै शृणोति तनिन्दां पापभाक्स भवेदिह ।४७

अरे दुष्ट ! तूने यह बिल्कुल असत्य ही कहा था कि मैं शिव को जानता हूँ । मैं कहती हूँ कि तू शिव को नहीं जानता है । शिव तो सर्वोपरि सबके बड़े स्वामी हैं ।४१। जैसे-तैसे कुछ भी हों—रुद्रदेव अपनी माया से बहुत से रूप वाले हैं । मैं खूब समझती हूँ कि वे मनोरथों को पूर्ण करने वाले विकारों से रहित और सत्पुरुषों के परम प्रिय हैं ।४२। नन्दीश्वर ने कहा—यह कहकर फिर पार्वती ने शिव के उस तत्व का वर्णन करना आरम्भ किया जिसमें ब्रह्मरूप से रुद्रदेव निर्गुण और अविनाशी कहे जाते हैं ।४३। यह पार्वती के वचन सुनकर वह ब्रह्मचारी वेषधारी ब्राह्मण जैसे ही कुछ कहने को प्रम्तुत हुआ वैसे ही उस समय में शिव के चरणों में आसक्त मन वाली शिव की निन्दा से रहित होकर अपनी सखी विजया से पार्वती शीघ्रता से कहने लगी ।४४-४५। पार्वती ने कहा—हे सखि ! यह नीच ब्राह्मण यहाँ से हटा देने के योग्य है । यह फिर भी कुछ कहना चाहता है । मैं चाहती हूँ कि आगे और कुछ शिव की निन्दा करने का अवसर इसे नहीं देना चाहिये ।४६। भगवान् शिव की निन्दा करने वाला तो महापापी होता ही है, जो उस निन्दा को केवल कानों से सुनता है उसे भी पाप का भागी होना पड़ता है ।४७।

शिवनिन्दाकरो वध्यः सर्वथा शिवकिंकरैः ।
ब्राह्मणश्चेत्य वै त्याज्यो गन्तव्यं तत्स्थालम्द्रुतम् ।४८
अयं दुष्टः पुनर्निन्दा करिष्यति शिवस्य हि ।
ब्राह्मणत्वादवध्यश्च त्याज्योऽदृश्यश्च सर्वथा ।४९
स्थलतेतद्द्रुत हित्वा यास्यामोऽन्यत्रमाचिरम् ।
यथा संभाषणं न स्यादनेनाविदुषा पुनः ।५०
इत्युक्त्वा चोमया यावत्पदमुत्क्षिप्यते मुने।
असौ तावच्छिवः साक्षादाललम्बे पटं स्वयम् ।५१
कृत्वा स्वरूपं दिव्यं च शिवाध्यानं यथा तथा ।
दर्शयित्वा शवायै तामुवाचावाङ्मुखीं शिवः ।५२
कुत्र त्वं यासि मां हित्वा न त्वं त्याज्या मया शिवे ।
मया परीक्षितासित्वं दृढ़भक्तासि मेऽनघे ।५३
ब्रह्मचारिस्वरूपेण भावमिच्छुस्त्वदीयकम् ।
तत्रोपकण्ठमागत्य प्रोवाचं विविधं वचः ।५४

जो शिव के सेवक हैं उनके द्वारा शिव की निन्दा करने वाले का वध कर देना चाहिए। हाँ, यदि दुर्भाग्य से ब्राह्मण जाति का हो तो उसे छोड़कर उस स्थान से जहाँ शिव की निन्दा होती हो अन्यत्र ही स्वयं शीघ्र चले जाना चाहिये ।४८। यह दुरात्मा फिर शिव की निन्दा करेगा क्योंकि यह विप्र है इसलिए वध करने योग्य नहीं है। यह त्याग देने के योग्य और सर्वथा दर्शन करने के लायक नहीं है ।४९। मैं अब इस स्थान का त्याग कर शीघ्र ही किसी अन्य स्थान पर जाना चाहती हूँ। जिससे फिर इस मूर्ख के साथ भाषण करने का कोई अवसर ही न आवे ।५०। नन्दीश्वर ने कहा—हे मुने ! इतना कह कर पार्वती ने ज्यों ही स्थिति का त्याग करना चाहा वैसे ही भगवान् शिव ने उसके वस्त्र को धारण कर लिया ।५१। पार्वती जिस स्वरूप का ध्यान किया करती थी शिवजी ने उसी स्वरूप को धारण कर पार्वती को दर्शन दिया और भूमि की ओर नीचे देखती हुई पार्वती से बोले ।५२। शिवजी ने कहा—हे शिवे ! हे अनघे ! अब तुम मुझे छोड़कर कहाँ जा रही हो ? तुम अब

मेरे त्याग करने योग्य नहीं हो। मैंने तुम्हारी अच्छी तरह परीक्षा कर ली है कि तुम्हारी मुझ में बहुत ही दृढ़ भक्ति है ।५३। मैं इसीलिए यह एक ब्रह्मचारी का रूप धारण कर तुम्हारे समीप में आया और अनेक वचन भी कहे ।५४।

प्रसन्नोऽस्मि दृढं भक्त्या शिवे तव विशेषतः ।
चित्तेप्सितं वरं ब्रूहि नादेयं विद्यते तव ।५५
ततः प्रहृष्टा सा दृष्ट्वा दिव्यरूपं शिवस्य तत् ।
प्रत्युवाच प्रभुं प्रीत्या लज्जाऽधोमुखी शिवा ।५६
यदि प्रसन्नो देवेश करोषि च कृपां मयि ।
पतिर्मे भव देवेश इत्युक्तः शिवया शिवः ।५७
गृहीत्वा विधिवत्पाणि कैलासं स तया ययौ ।
पति तं गिरिजा प्राप्य देवकार्यं चकार सा ।५८
इति प्रोक्तस्तु ते तात ब्रह्मचारिस्वरूपकः ।
शिवावतारो हि मया शिवाभावपरीक्षकः ।५९

हे पार्वती ! मैं तेरी अनुपम दृढ़ भक्ति से विशेष रूप से प्रसन्न हुआ हूँ। अब तू अपने मनचाहे वर को माँग ले। तुझे अब कोई भी अदेय वस्तु नहीं है ।५५। परम प्रसन्न पार्वती शिव के दिव्य स्वरूप का दर्शन कर लज्जा से नीचे की ओर अपना मुख करती हुई प्रेमपूर्वक शिव से प्रार्थना करने लगी ।५६। पार्वती ने कहा—हे देवेश ! यदि परम प्रसन्न होकर मुझ पर कृपा करना चाहते हैं तो आप मुझको अङ्गीकार कीजिए ।५७। उस समय शिवजी विधि-विधान के साथ पार्वती का पाणिग्रहण कर उन्हें अपने सङ्ग कैलाश पर्वत पर ले गये। पार्वती ने अपने अभीष्ट पति को पाकर देवों के कार्य सम्पन्न किये ।५८। हे तात ! ब्रह्मचारी का स्वरूप धारण कर पार्वती की परीक्षा करने वाले शिवजी के जटिल अवतार का वर्णन मैंने किया है ।५९।

## ॥ प्रथम भाग समाप्त ॥

प्रकाशक :
डॉ० चमनलाल गौतम
संस्कृति संस्थान,
ख्वाजा कुतुब (वेद नगर)
बरेली (उ० प्र०)

★

सम्पादक :
पं० श्रीराम शर्मा आचार्य

सर्वाधिकार सुरक्षित

★

संशोधित जनोपयोगी संस्करण
१९७२

★

मुद्रक :
हर्ष गुप्त
राष्ट्रीय प्रेस, मथुरा।

★

मूल्य सजिल्द रुपये पचास पैसे

12/-5
LIBRARY
UNIVERSITY OF ALBERTA

# श्रीशिवपुराण

## ( प्रथम खण्ड )

( सरल भाषानुवाद जनोपयोगी संस्करण )

★

सम्पादक :

वेदमूर्ति, तपोनिष्ठ

पं० श्रीराम शर्मा आचार्य

चारों वेद, १०८ उपनिषद, षट्दर्शन, २४ गीता
योग वासिष्ठ, २० स्मृतियां और १८ पुराणों
के प्रसिद्ध भाष्यकार

★

प्रकाशक :

संस्कृति संस्थान

ख्वाजा कुतुब, [वेद नगर] बरेली